भर्तृदारिका, स्त्री, ( भर्तृदारक+टापि अत इत्वम् । ) नाट्योक्तौ राजसुता । इत्यमरः । १ । ७ । १३ ॥

भर्तृहरिः, पुं, स्वनामख्यातः काव्यकर्तृराजविशेषः । इति जटाधरः । स च विक्रमादित्यभ्राता ॥ ( अयमेव गन्धर्व्वसेनात् दासीगर्भजातः । यथा, राजावल्याम् । ४ । १-२ ।
"अथ कालेन कियता रममाणो महीतले ।
दास्यां गन्धर्व्वसेनस्तु पुत्त्रमेकमजीजनत् ॥
तस्य भर्तृहरीत्येवं नाम चक्रे महामतिः ॥")

भर्त्स, क ङ न भर्त्से । इति कविकल्पद्रुमः ॥ ( चुरा०-आत्म०-उभ० च-सक०-सेट् । ) रेफयुक्तः । दन्त्यवर्गाद्योपधः । भर्त्सो भर्त्सनम् । भर्त्सनन्त्वपकारगीरित्यमरः । १ । ६ । १४ ॥ क ङ, भर्त्सयते खलं राजा । न, भर्त्सयति भर्त्सयते । अयमात्मनेपदीत्यन्ये । कदाचित् परस्मैपदार्थो नकारः । इति दुर्गादासः ॥

भर्त्सनं, क्ली, ( भर्त्स+ल्युट् । ) अपकारगीः । इत्यमरः । १ । ६ । १४ ॥ चौरोऽसि त्वां घातयिष्यामि इत्याद्यपकारार्थं वचनम् । इति भरतः ॥ तत्पर्य्यायः । कुत्सा २ निन्दा ३ जुगुप्सा ४ गर्हा ५ गर्हणम् ६ निन्दनम् ७ कुत्सनम् ८ परिवादः ९ परीवादः १० जुगुप्सनम् ११ आक्षेपः १२ अवर्णः १३ निर्व्वादः १४ अपक्रोशः १५ । इति शब्दरत्नावली ॥ ( भर्त्स+शुच् । भर्त्सनाप्यत्रार्थे । यथा, कथासरित्सागरे । ३२ । ५३ ।
"इत्यादि भर्त्सनां कृत्वा गच्छद्भिस्तैः समं स च ।
विवशः प्रययौ विष्णुदत्तस्तूर्ष्णीं बभूव च ॥")

भर्त्सपत्त्रिका, स्त्री, ( भर्त्स्यते स्मेति । भर्त्स+घञ् । भर्त्सं निन्दितं पत्त्रं यस्याः । कप् । टाप् । अत इत्वम् ।) महानीली । इति राजनिर्घण्टः ॥ (भर्त्स्यपत्त्रिकापि पाठः ।)

भर्म्म, क्ली, ( भ्रियतेऽनेनेति । भृ+बाहुलकात् मन् ।) स्वर्णम् । भृतिः । नाभिः । इति द्विरूपकोषः ॥

भर्म्म, [ न् ] क्ली, ( भरति भ्रियते वेति । भृञ् + "सर्व्वधातुभ्यो मनिन् ।" उणा० ४।१४४। इति मनिन् । ) वेतनम् । इति हेमचन्द्रः ॥ स्वर्णम् । धुस्तूरम् । इत्यमरः ।३।६।६४ ॥ नाभिः । इति विश्वः ॥ (भरणम् । यथा, ऋग्वेदे ।१०।८८।१ ।
"हविष्पान्तमजरं स्वर्विदि दिविस्पृश्याहुतं
जुष्टमग्नौ ।
तस्य भर्म्मणे भुवनाय देवा धर्म्मणे कं स्वधया
पप्रथन्त ॥"
"भर्म्मणे भरणाय ।" इति तद्भाष्ये सायनः ॥)

भर्म्मण्या, स्त्री, ( भर्म्मणि भरणे साधुरिति । भर्म्मन्+यत् । टाप् । ) वेतनम् । इति हेमचन्द्रः ॥

भर्भ, हिंसे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । ) रेफोपधः । भर्भति । इति दुर्गादासः ॥

भर्व्व, हिंसे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) भर्व्वति । अन्तःस्थवान्तोऽयम् । इति दुर्गादासः ॥

भल, क ङ निरूपणे । इति कविकल्पद्रुमः ॥ ( चुरा०-आत्म०-सक०-सेट् ।) क ङ, भालयते । इति दुर्गादासः ॥

भल, ङ दानवधनिरूपणेषु । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-सक०-सेट् । ) ङ, भलते । इति दुर्गादासः ॥

भलता, स्त्री, ( भातीति । भा+बाहुलकात् डः । भा चासौ लता चेति कर्म्मधारयः ।) राजबला । इति शब्दरत्नावली ॥

भलन्दनः, पुं, कान्यकुब्जदेशीयनृपविशेषः । यथा,
"कलावती कान्यकुब्जे बभूवायोनिसम्भवा ।
जातिस्मरा महासाध्वी सुन्दरी कमला कला ॥
कान्यकुब्जे नृपश्रेष्ठो भलन्दन उरुक्रमः ।
स तां संप्राप योगान्ते यज्ञकुण्डसमुत्थिताम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः ॥

भल्ल, ङ दानवधनिरूपणेषु । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-सक०-सेट् । ) लद्वयान्तः । ङ, भल्लते । इति दुर्गादासः ॥

भल्लः, पुं, ( भल्लते इति । भल्ल+अच् । ) भल्लूकः । इत्यमरः । २ । ५ । ४ ॥ ( देशभेदः । यथा, बृहत्संहितायाम् । १४ । ३० ।
"ब्रह्मपुरदार्व्वडामर-
वनराज्यकिरातचीनकौणिन्दाः ।
भल्लापलोलजटासुर-
कुनठखषघोषकुचिकाख्याः ॥")

भल्लः, पुं क्ली, ( भल्लते हन्तीति । भल्ल+अच् । ) शस्त्रभेदः । इति मेदिनी शब्दमाला च । भाला इति भाषा ॥ (यथा महाभारते ।१।१४०।६।
"प्रगाढ़दृढ़सुष्टित्वे लाघवे वेधने तथा ।
क्षुरनाराचभल्लानां विपाठानाञ्च तत्त्ववित् ॥"
अनेन देहविद्धशल्यादिकमुद्धरति । यथा,—
"स च शल्योद्धरणकः प्रोच्यते वैद्यकागमे ।
नाराचबाणशूलाद्यैर्भल्लैः कुन्तैश्च तोमरैः ॥"
इति हारीते प्रथमे स्थाने द्वितीयेऽध्याये ॥)

भल्लकः, पुं, ( भल्ल+स्वार्थे कन् । ) भल्लूकः । इति द्विरूपकोषः ॥ ( पक्षिभेदः । यथा, भागवते । ३ । १० । २३ ।
"काकगृध्रवकश्येनभासभल्लकवर्हिणः ।
हंससारसचक्राह्वकाकोलूकादयः खगाः ॥")

भल्लपुच्छी, स्त्री, ( भल्लस्य पुच्छमिव पुष्पं यस्याः ।) गवेधुका । इति शब्दचन्द्रिका ॥ गोरचतण्डुला इति ख्याता ॥

भल्लाटं, क्ली, शशिध्वजराजपुरम् । यथा,—
"सेनागणैः परिवृतः कल्किर्नारायणः प्रभुः ।
भल्लाटनगरं प्रायात् खड्गधृक् सप्तिवाहनः ॥"
इति कल्किपुराणे । २२ अध्यायः ॥
(दण्डसेनस्य पुत्त्रे, पुं । यथा, हरिवंशे ।२०।३२।
"विष्वक्सेनस्य पुत्त्रोऽभूत् दण्डसेनो महीपतिः ।
भल्लाटो तत्कुमारोऽभूद्राधेयेन हतः पुरा ॥")

भल्लातः, पुं, ( भल्लं भल्लास्त्रमिव अतति आत्मानं ज्ञापयतीति । अत+अच् । ) भल्लातकवृक्षः । इति रत्नमाला ॥ (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"भल्लाताभावतश्चित्रं नलदश्चोरभावतः ॥")

भल्लातकः, पुं, ( भल्ल इवाततीति । अत+क्वुन् । यद्वा, भल्लात+स्वार्थे कन् । ) वृक्षविशेषः । भेला इति भाषा । तत्पर्य्यायः । अरुष्करः २ भल्लातः ३ शोथहृत् ४ वह्निनामा ५ वीरतरुः ६ व्रणकृत् ७ भूतनाशनः ८ । इति रत्नमाला ॥ भल्लातकी ९ अग्निमुखी १० वीरवृक्षः ११ । इत्यमरः ॥ निर्दहनः १२ तपनः १३ अनलः १४ क्रिमिघ्नः १५ शैलबीजः १६ वातारिः १७ स्फोटबीजकः १८ पृथग्बीजः १९ धनुर्वृक्षः २० बीजपादपः २१ वह्निः २२ । ( यथा, सुश्रुते । सूत्रस्थाने । ४६ ।
"उष्णोदकानुपानन्तु स्नेहानामथ शस्यते ।
ऋते भल्लातकस्नेहात् स्नेहात्तौवरकात्तथा ॥")
अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । उष्णत्वम् । क्रिमिकफवातोदरानाहमेहदुर्नामनाशित्वञ्च । तत्फलगुणाः । कषायत्वम् । मधुरत्वम् । कोष्णत्वम् । कफार्त्तिश्रमश्वासानाहविबन्धशूलजठराध्मानक्रिमिनाशित्वञ्च । तन्मज्जगुणाः । विशेषेण दाहशमनत्वम् । पित्तापहत्वम् । तर्पणत्वम् । वातारोचकहारित्वम् । दीप्तिजनकत्वम् । पित्तनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"भल्लातकं त्रिषु प्रोक्तमरुष्कोऽरुष्करोऽग्निकः ।
तथैवाग्निमुखी भल्ली वीरवृक्षश्च शोफहृत् ॥
भल्लातकफलं पक्वं स्वादुपाकरसं लघु ।
कषायं पाचनं स्निग्धं तीक्ष्णोष्णं छेदि भेदनम् ॥
मेध्यं वह्निकरं हन्ति कफवातव्रणोदरम् ।
कुष्ठार्शोग्रहणीगुल्मशोफानाहज्वरक्रमीन् ॥
तन्मज्जा मधुरो वृष्यो बृंहणो वातपित्तहा ।
वृन्तमारुष्करं स्वादु पित्तघ्नं केश्यमग्निकृत् ॥
भल्लातकः कषायोष्णः शुक्रलो मधुरो लघुः ।
वातश्लेष्मोदरानाहकुष्ठार्शोग्रहणीगदान् ॥
हन्ति गुल्मज्वरं श्वित्रवह्निमान्द्यक्रिमिव्रणान् ॥"
इति भावप्रकाशः ॥
अन्यच्च ।
"भल्लातकफलं स्निग्धं क्रिमिदुर्नामनाशनम् ।
दन्तस्थैर्य्यकरं ग्राहि कषायं मधुरञ्च तत् ॥
भल्लातवृन्तं मधुरं कषायं वातकोपनम् ॥"
इति राजवल्लभः ॥

भल्लातकी, स्त्री, (भल्लातक+गौरादित्वात् ङीष् ।) भल्लातकवृक्षः । इत्यमरः ॥

भल्लिका, स्त्री, (भल्ल्+अच् । स्वार्थे कन् । टाप् । अत इत्वम् । ) भल्लातकः । इति शब्दचन्द्रिका ॥

भल्ली, त्रि, ( भल्ल+गौरादित्वात् ङीष् । ) भल्लातकः । इति शब्दरत्नावली ॥ (अस्याः पर्य्यायः ।